M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. [illegible]
Ser. [illegible]

Title: [illegible]
Shastr[illegible]

[illegible]

1025

Complete

Gomukh Rasava Santi	Title
	Author
	Editor
SK	Year, Vols.
	Publisher
1025	Remarks

अथगोमुखप्रसवशांतिः देशकालौसंकीर्त्यअस्यबालकस्यअ
मुकनक्षत्रोत्पन्नेःसूचितारिष्टनिरसनद्वाराश्रीप० गोमुख
प्रसवशांतिंकरिष्ये तदंगगणेशपूजनंआचार्यवर्णनंक
रिष्ये ततः आचार्यःश्वेतवर्णपंकजमध्येयथाशक्तिव्रीही
न् निक्षिप्यतेषुशूर्पंनिधायशूर्पेरक्तवस्त्रंप्रसार्यतत्राति
लान् विकीर्यशूर्पप्राङ्मुखंशिशुंनिधायसूत्रेणशूर्पवेष्ट
यित्वाशिशुसमीपेगोमुखमानीयप्रसवंभावयित्वा विष्णु

योनिर्भिन्नि स्सूक्तेन यथामीलितेन पंचकैव्येनाशिशुं स्नपयेत् ॥ वि
ष्णुर्योनिमितिति स्रूणां त्वष्टा विष्णुरनुष्टुप् ॥ शिशुस्नपने वि॰
१ ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ॥ आसिंचतु प्रजा
पतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि स
रस्वति ॥ गर्भं ते अश्विनो देवावाधत्तां पुष्करस्रजा ॥ हिरंण्य
यी अरणी यं निर्मंथतो अश्विना ॥ तं ते गर्भं हवामहे दशमे मा २
सि स्रूतवे ॥ ३ ॥ गवामंगे ध्विति मंत्रेण वामांगे सर्वांगे वा स्पर्शेत्

गवामंगेषु तिष्ठंति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मेस्यादिहलो
केपरत्र च ॥ ततः आचार्यो विष्णोः श्रेष्ठेनेति शिशुमातायमात्रे
दद्यात् ॥ विष्णोः श्रेष्ठेनेति त्वष्टा विष्णुरनुष्टुप् ॥ शिशुमात्रेनि
वेदने वि॰ ॥ ॐ विष्णो श्रेष्ठेन रूपेणास्यां नार्यां गवीन्यां ॥
पुमांसं पुत्रानाधेहि दशमे मासि स्रूतवे ॥ १ ॥ ततो माता
पित्रे दत्वा पुनः पितामात्रे दद्यात् ॥ वस्त्रमपसार्य पुत्रमुखमवेक्ष्य
ते ॥ ततः आचार्याः शिशुं पंचगव्येन आपो हि ष्ठेति तिसृभिरभि॰

गोप्र·शां· षिंचेत्॥ ततः पिता अंगादंगादितिमंत्रेण शिशुमूर्द्धनिजिघ्राय॥ ॐ
2 अंगादंगात्संभवसिहृदयादधिजायसे॥ आत्मावैपुत्रनामासिस
जीवशरदः शतं॥ मात्रहस्तेदत्वा॥ अस्य गोमुखप्रसव शांत्यर्थं
पुण्याहं भवंतोब्रुवंतु॥ स्वस्तिं भवंतोब्रुवंतु॥ ऋद्धिं भवंतोब्रुवंतु॥
श्रीरस्त्वितिभवंतोब्रुवंतु॥ कल्याणंभवंतोब्रुवंतु॥ इतिवदेद
गान्याचार्यायदद्यात्॥ ग्रहप्रीत्यर्थं प्रत्येकं गोवस्त्रस्वर्णधान्या 2
दि दत्वा यथाशक्तिप्रेयसीं दक्षिणां दत्वा॥ आचार्योग्निंग्रहांश्च

मिलित

प्रतिष्ठाप्यान्वादध्यात्॥ अत्रप्रधानं॥ ग्रहान् अमुकसंख्याकाभिः॥ स
मित्तिलाज्याहुतिभिः॥ लोकपालान्नास्ति॥ अपश्चात्तुर्वारं विष्णुस
हृद्यक्ष्माणंषड्वारं अष्टाविंशतिसंख्ययाअष्टसंख्ययावाप्रत्य
चंदधिमध्वाज्यद्रव्येणशेषेणस्विष्टकृतमित्यादिआज्यभागांतं
कृत्वाग्नेरीशान्यांकुंभंसंस्थाप्यतत्रपंचगव्येतिलान्श्रीहीं क्षीर
द्रुमकषायान्निक्षिप्यवस्त्रयुग्मेनसंस्थाप्यपूर्णपात्रोपरितत्त
द्विष्णोरितिमंत्रेणविष्णुप्रतिमांतत्वायामीतिवरुणप्रतिमांवा

गोप्र. ग्न्युत्तारणपूर्वकांसमभ्यर्च्य॥ एको ऋत्विकुकुंभंस्पृष्ट्वावस्यमा
३ पामंत्रान्जपेत्॥ यत इंद्रेति षण्णां कण्व: पुत्र: प्रगाथ इंद्रो
बार्हतप्रगाथछंद:॥ जपेवि० ॐ यत इंद्र भयामहे ततो नो
अभयंकृधि॥ मघवन्छग्धि तव तन्न ऊतिभिर्विद्विषोविमृ
धोजहि॥ त्वंहि राधस्पते राधसो महः क्षयस्यासि विधत:॥ ३
तंत्वा वयं मघवन्निंद्र गिर्वण: सुतावंतो हवामहे॥ इंद्रस्पळु

नवृत्रहा परस्पानोवरेण्य:॥ सनोरक्षिषच्चरमंसमध्यमंसपश्चा
त्पातु न: पुर:॥ त्वंन: पश्चादधरादुत्तरात्पुर इंद्र नि पाहि विश्व
त:॥ आरे अस्मत्कृणुहि दैव्यंभयमारे हेतीरदेवी:॥ अ
द्याद्याश्व: श्व इंद्र त्रास्व परे च न:॥ विश्वा च नो जरितॄन्त्स
त्पते अहा दिवा नक्तं च रक्षिष:॥ प्रभंगी शूरो मघवा तुवी
मघ: संमिश्लो वीर्याय कं॥ उभा ते बाहू वृषणा शतक्रतो नि
या वज्रं मिमिक्षतु:॥ उक्तद्रव्यै: आदित्यादि नवग्रहहोम: ॐ

गो० यात्॥ ततोदधिमध्वाज्यैर्होमः कुर्यात्॥ तत्रमंत्राः॥ आपोति हिष्ठे
तिसृणां सिंधुद्वीप आंबरीष आपोगायत्री॥ दधिमध्वाज्य
८ होमेवि०॥ अप्सुमेमेधातिथिरापोनुष्टुप्॥ दधिमध्वाज्य०
नद्विष्णोर्मेधातिथिर्विष्णुर्गायत्री॥ दधिमध्वा० अक्षीभ्या
मितिषण्णांकश्यपो विवृहा यक्ष्महानुष्टुप्॥ दधिमध्वा०
ॐ अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुकाद्दधि॥ यक्ष्मं
शीर्षण्यंमस्तिष्काज्जिह्वाया विवृहामिते स्वाहा॥ यक्ष्महाये०

ॐ ग्रीवाभ्यस्तउष्णिहाभ्यः कीकसाभ्यो अनूक्यात्॥ यक्ष्मंदो
षंण्य१मंसाभ्यांबाहुभ्यां विवृहामितेस्वाहा॥ यक्ष्महायेदं० २
आंत्रेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयाद्दधि॥ यक्ष्मंमतः स्नाभ्यां
यक्नः प्लाशिभ्यो विवृहामितेस्वाहा॥ यक्ष्महायेदं० ३ ॐ ऊ
रुभ्यांते अष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां॥ यक्ष्मंश्रोणिभ्यां
भासदाद्भंससो विवृहामिते स्वाहा॥ यक्ष्महा० ४ ॐ मेहना
द्वनंकरणाल्लोमभ्यस्तेनखेभ्यः॥ यक्ष्मंसर्वस्मादात्मनस्तमिदं

गो॰ति॰ विवृहामितेस्वाहा ॥ यक्ष्महायेदं॰ ॐ अंगादंगाल्लोम्नोलोम्नोजा
तंपर्वणिपर्वणि ॥ यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामितेस्वा
५ हा ॥ यक्ष्महायेदं॰ ॥ ६ ॥ ऋक्६ ॥ एतैर्मंत्रैर्दधिमध्वाज्यंहुत्वा
स्विष्टकृदादिहोमशेषंसमाप्यउत्तरपूजनंकुर्यात् ॥ ततोग्निं
ग्रहांश्चविसृज्याचार्यायप्रतिमांप्रतिपाद्ययस्यस्मृत्येति
कर्मशेषंसमापयेत् ॥ ॥ इतिगोमुखप्रसवशांतिःसमा- ५
प्तः ॥ ॥ ॥ ॥ ॥